167114

**K19U 2178**

Reg. No. : ................................

Name : ....................................

GOVT. BRENNEN COLLEGE CENTRAL LIBRARY THALASSERY

**V Semester B. A. Degree (CBCSS - Reg.) Examination, November 2019**
**(2017 Admn. Only)**
**CORE COURSE IN SANSKRIT**
**5B08 SKT : SANDESA KAVYA AND STHOTRA KAVYA**

Time : 3 Hours | Max. Marks : 40

संस्कृतभाषया उत्तराणि देयानि देवनागरीलिपिरुपयोक्तव्या।

**I.** वाक्येनैकेन द्वाभ्यां वा अष्टानामुत्तरं लिखत **(8 × 1 = 8)**

1) कोकिलसन्देशस्य कर्ता कः ?
2) कालिदासविरचिते द्वे महाकाव्ये के ?
3) सन्देशकाव्यस्य वृत्तं ?
4) मेघदूते नायकः कः ?
5) मेघः कस्मिन् वंशे जातः ?
6) मेघः केषां सन्निपातः ?
7) 'लोचनैर्वञ्चितोऽसि' - किं न चेत् ?
8) श्रीकृष्णकर्णामृतं कस्मिन् काव्यविभागे अन्तर्भवति ?
9) नारायण भट्टविरचितं प्रसिद्धं स्तोत्रकाव्यं ?
10) मनसि मे विजृम्भताम्: किम् ?
11) उपास्यमन्यन्न विलोकयामः - किं किं अपास्य ?
12) श्रीकृष्णकर्णामृते कति सर्गाः सन्ति ?

**II.** चत्वारि समग्रं व्याख्यात : **(4 × 3 = 12)**

13) संतप्तानां त्वमसि शरणं तत्पयोद प्रियायाः
सन्देशं मे हर धनपतिक्रोध विश्लेषितस्य।
गन्तव्या ते वसतिरलका नाम यक्षेश्वराणां
बाह्योद्यानस्थितहरशिर श्चन्द्रिकाधौतहर्म्या।।

P.T.O.

14) वक्रः पन्था यदपि भवतः प्रस्थितस्योत्तराशां
सौधोत्सङ्गप्रणयविमुखो मा स्म भूरुज्जयिन्याः।
विद्युद्दामस्फुरतिचकितैस्तत्र पौराङ्गनानां
लोलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितोऽसि॥

15) गच्छन्तीनां रमणवसतिं योषितां तत्र नक्तं
रुद्धालोके नरपतिपथे सूचिभेद्यैस्तमोभिः।
सौदामन्या कनकनिकषस्निग्धया दर्शयोर्वीं
तोयोत्सर्गस्तनितमुखरो मा च भूर्विक्लवास्ताः॥

16) तं चेद्वायौ सरति सरलस्कन्धसंघट्टजन्मा
बाधेतोल्काक्षपितचमरीबालभारो दवाग्निः।
अर्हस्येनं शमयितुमलं वारिधारासहस्रै -
रापन्नार्तिप्रशमनफलाः संपदो ह्युत्तमानाम्॥

17) चिन्तामणिर्जयति सोमगिरिर्गुरुर्मे
शिक्षागुरुश्च भगवाञ्शिखिपिञ्छमौलिः
यत्पादकल्पतरुपल्लवशेखरेषु
लीलास्वयंवररसं लभते जयश्रीः।

18) अपाङ्गरेखाभिर भङ्गुराभि -
रनागलीलारसरञ्चिताभिः
अनुक्षणं वल्लवसुन्दरीभि -
रभ्यर्च्यमानं विभुमाश्रयामः

III. सप्रकरणं चत्वारि व्याख्यात :- (4 × 2 = 8)

19) सद्यः पाति प्रणयि हृदयं विप्रयोगे रुणद्धि।

20) शिप्रावातः प्रियतम इव प्रार्थनाचाटुकारः।

21) अन्तःशुद्धस्त्वमपि भविता वर्णमात्रेण कृष्णः।

22) कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे।

23) तरलं किञ्चन धाम सन्निधत्ताम्।

24) प्रभवतु हृदये नः प्राणनाथः किशोरः।



IV. द्वावुपन्यस्यत :- (2 × 6 = 12)

25) सन्देशकाव्येषु मेघदूतस्य प्राधान्यं निरुपयत।

26) पूर्वमेघानुसारं मेघस्य मार्गं संक्षिपत।

27) कालिदासस्य उपमाप्रयोगचातुरीं निरुपयत।

28) विल्वमङ्गलस्य वर्णनापाटवं यथाग्रन्थं उपन्यस्यत।

---